श्रीगणेशाय नमः ॥ श्रीनर्मदा
देव्यै नमः ॥ ॐ अस्य श्रीइन्द्रा
क्षीस्तोत्रमंत्रस्य पुरंदर ऋषिः॥
अनुष्टुप् छंदः॥ इन्द्राक्षी देवता॥
महालक्ष्मी बीजम् ॥ भुवनेश्वरी

शक्तिः ॥ भवानीति कीलकम् ॥
मम सर्वाभीष्टसिद्ध्यर्थं श्रीइ
न्द्राक्षीवरप्रसादसिद्ध्यर्थं जपे
विनियोगः ॥ अथ न्यासः ॥ इ
न्द्राक्षी अंगुष्ठाभ्यां नमः ॥ महा

लक्ष्मी तर्जनीभ्यां नमः ॥ माहे
श्वरी मध्यमाभ्यां नमः॥अंबुजा
क्षी अनामिकाभ्यां नमः ॥ का
त्यायनी कनिष्ठिकाभ्यां नमः

कौमारी करतलकरपृष्ठाभ्यां न

मः॥एवं हृदयादिः ॥ इंद्राक्षी हृ
दयाय नमः॥ महालक्ष्मी शिरसे
स्वाहा॥माहेश्वरी शिखायै वषट्
अंबुजाक्षी कवचाय हुम् ॥ का
त्यायनी नेत्रत्रयाय वौषट् ॥ कौ

मारी अस्त्राय फट् ॥ ॐ ह्रां हृद
याय नमः॥ॐ ह्रीं शिरसेस्वाहा॥
ॐ ह्रूं शिखाय वषट् ॥ ॐ ह्रैं क
वचाय हुम् ॥ ॐ ह्रौं नेत्रत्रयाय
वौषट्॥ ॐ ह्रः अस्त्राय फट् ॥ अ

थ दिग्बंधः॥ प्राच्यै दिशे नमः॥
इंद्रायनमः॥आग्नेय्यैदिशेनमः॥
अग्नये नमः॥ याम्यायै दिशे न
मः॥ यमाय नमः॥नैर्ऋत्यै दिशे
नमः।नैर्ऋत्याय नमः ॥प्रतीच्यै

दिशे नमः॥ वरुणाय नमः॥ वा
यव्यै दिशे नमः॥ वायवे नमः॥
उदीच्यै दिशे नमः॥ कुबेराय न
मः॥ईशान्यैदिशेनमः॥ ईश्वराय
नमः॥ऊर्ध्वायैदिशे नमः॥ब्रह्मणे

इंद्रा० नमः॥ अधरायै दिशे नमः॥ अन स्तो०

८ न्ताय नमः ॥ ॐ भूः ॐ भुवः

ॐस्वरोमिति दिग्वंधनम् ॥ अथ

ध्यानम् ॥ इन्द्राक्षीं द्विभुजांदेवीं ८

पीतवस्त्रद्वयान्विताम् ।वामहस्ते

वज्रधरां दक्षिणेनवरप्रदाम् ॥ १ ॥
इन्द्राक्षीं सहस्रयुवतीनानालं
कारभषिताम् ॥ प्रसन्नवदनांभो
जामप्सरोगणसेविताम् ॥ २ ॥ अ
थ मंत्रः ॥ ॐ ऐंह्रीं श्रींह्रींइंद्राक्षी

क्लीं श्रा ह्रीं ए ॐ स्वाहा ॥ अष्टो
त्तरशतं जप्त्वा सर्वसिद्धिप्रदाय
कम्॥इन्द्र उवाच॥ इन्द्राक्षी ना
म सा देवी दैवतैः समुदाहृता॥
गौरी शाकंभरी देवी दुगानाम्नी

ति विश्रुता ॥ १ ॥ कात्यायनी
महादेवी चन्द्रघंटा महातपा ॥
सावित्री सा च गायत्री ब्रह्माणी
ब्रह्मवादिनी ॥ २ ॥ नारायणी

भद्रकाली रुद्राणी कृष्णपिंग

७ ला॥ अग्निज्वाला रौद्रमुखी का
लरात्रिस्तपस्विनी ॥ ३ ॥ मेघ
श्यामा सहस्राक्षी विकटांगी ज
लोदरी॥ महोदरी मुक्तकेशी घो
रूपा महाबला ॥ ४ ॥ अद्रिजा

भद्रजा नंदा रोगहंत्री शिवप्रिया
शिवदूती कराली च प्रत्यक्षपर
मेश्वरी ॥ ५ ॥ इन्द्राणी इन्द्ररू
पा च इन्द्रशक्तिपरायणा॥ सदा

संमोहिनी देवी सुन्दरी भुवनेश्व

री ॥ ६ ॥ एकाक्षरी परब्रह्मस्थू
लसूक्ष्मप्रवर्द्धिनी ॥ वाराही नार
सिंही च भीमा भैरवनादिनी
॥७॥ श्रुतिः स्मृतिर्धृतिर्मेधा वि ८
द्या लक्ष्मीः सरस्वती ॥ अनंता

विजया पूर्णा मानस्तोकापरा
जिता ॥ ८ ॥ भवानी पार्वती दु
र्गा हैमवत्यंबिका शिवा ॥ शि
वा भवानी रुद्राणी शंकरार्द्धश
रीरिणी ॥९॥ एतैर्नामपदैर्दिव्यैः

स्तुता शक्रेण धीमता ॥ आयुरा
रोग्यमैश्वर्यं ज्ञानवित्तयशोब
लम् ॥ १० ॥ शतमावर्त्तयेद्यस्तु
मुच्यत व्याधिबंधनात् ॥ आव
र्तन सहस्रंतु लभते वांछितं फल

म् ॥ ११ ॥ राजानं च समाप्नोति
इन्द्राक्षीं नात्र संशयः ॥ नाभि
मात्रे जले स्थित्वा सहस्रपरिसं
ख्यया ॥ १२ ॥ जपेत्स्तोत्रमिदं
मंत्रं वाचासिद्धिर्भवेद्ध्रुवम् । सा

यंप्रातः पठेन्नित्यं षण्मासैः सि
द्धिरुच्यते ॥ १३ ॥ संवत्सरमु
पाश्रित्य सर्वकामार्थसिद्धये ॥
अनेन विधिना भक्त्या मंत्रसि
द्धिः प्रजायते ॥ १४ ॥ संतुष्टा

च भवेद्देवी प्रत्यक्षं संप्रजा
यते॥अष्टम्यां च चतुर्दश्यामिदं
स्तोत्रं पठेन्नरः ॥ १५ ॥ धावत
स्तस्य नश्यंति विघ्नसंख्या न
संशयः॥ कारागृहे यदा बद्धो म

ध्यरात्रे तदा जपेत् ॥ १६॥ दि
वसत्रयमात्रेण मुच्यते नात्र सं
शयः ॥ सकामो जपते स्तोत्रं
मन्त्रपूजाविचारतः ॥ १७ ॥ पं
चाधिकैर्दशादित्यैरियं सिद्धि

स्तु जायते ॥ रक्तपुष्पै रक्तवस्त्रै
रक्तचंदनचार्च्चितैः ॥ १८ ॥ धूप
दीपैश्च नैवेद्यैः प्रसन्ना भगवती
भवेत् ॥ एवं संपूज्य इन्द्राक्षीमि
न्द्रेण परमात्मना ॥ १९ ॥

वरं लब्धं दितेः पुत्रा भगवत्याः
प्रसादतः ॥२०॥ हरिः ॐ तत्सत्
॥ इति श्रीमदिन्द्रोक्तमिन्द्राक्षी
स्तोत्रं संपूर्णम् ॥ शुभमस्तु ॥

इदं पुस्तकं क्षेमराजश्रीकृष्णदा-
सश्रेष्ठिना मुम्बय्यां (खेतवाडी
७वीं गली खम्बाटा लैन)स्वकीये
"श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रण-
यंत्रालये मुद्रयित्वाप्रकाशितम्.

सं० १९७१ शके. १८३६.

जा० | ## क्रय्यपुस्तकानि (स्तोत्रग्रंथाः ।) | रा०

१३

नाम.	की. रु. आ.
बृहत्स्तोत्ररत्नाकर-(स्तोत्रसंख्या १४४) शिव, गणपति, विष्णु, देवी, सूर्य, राम, वेदान्त, गंगादिसरिता इत्यादिकके भक्तिमय स्तुति वर्णन नित्य पाठोपयोगी है (मोटाअक्षर)...	०—१४

१२

हनुमान्सहस्रनाम—	...	...	०—२
यमुनासहस्रनाम—	...	...	०—१॥
नृसिंहसहस्रनाम—	...	...	०—३
रामसहस्रनाम—	...	...	०—१॥
चर्पटपंजरी—मूल)॥ भा. टी.		...	०—॥
शिवमहिम्न सटीक अन्वयार्थ भाषा टीका	...	...	०—१॥
शिवमहिम्न—मूल बड़े अक्षरका		...	०—१॥

जा० रामस्तवराज—रामरक्षा बड़ेअक्षरका रेशमी रा०
१४ गुटका ... ... ०—६
रामस्तवराज—बडे अक्षरका ... ०—१॥
रामरक्षा— ... ... ०—॥।
रामसन्मंगल स्तोत्र ... ... ०—१
नृसिंहकवच— ... ... ०—१ १४
सरस्वतीस्तोत्रकवच—भाषाटीकासमेत
(पाठकरनेसे विद्या प्राप्त होतीहै) ०—१॥

जा० लक्ष्मीनारायणहृदय—लक्ष्मीदेवीकी रा०
१६ स्तुति करनेसे दारिद्र्य दूर होताहै ०—२
लक्ष्मीस्तोत्र— " " ... ०—१॥
आदित्यहृदयबड़ाअक्षर—सूर्यनारायण
की आराधना ... ... ०—२
पुरुषोत्तमसहस्रनाम—भागवतोद्धृत सह १६
सनाम ०—१॥
महालक्ष्मीस्तोत्र— ... ... ०—१